च तनुर्या ते स सर्वं भक्षयिष्यति। यथा सूर्य्यांशुभिः स्पृष्टं सर्वं शुचि विभाव्यते। तथा त्वदर्च्चिर्भिर्दग्धं सर्वं शुचि भविष्यति। त्वमग्ने! परमं तेजः स्वप्रभावाद्विनिर्गतम्। स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो!। देवानां चात्मनो भागं गृहाण त्वं मुखे हुतम्”। क्रव्याच्छब्ददर्शिते शत० ब्रा० वाक्येन ऋग्वेदवाक्येन च तस्य कर्म्मादावपसारणमुक्तम्। “क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्योहव्यं वहतु प्रजानन्” ऋ०१०,१६,९,भा०

“आहिताग्निमरणे एतदादिके द्वे ऋचौ औपासनोद्वासने विनियुक्ते तत्र प्रथमायाः पूर्व्वार्द्धेन दक्षिणस्यां दिशि चतुष्पथादावौपासनाग्निं निरस्यति उत्तरे शान्तिकर्म्मार्थमादत्ते। “क्रव्यादं क्रव्यमामिषं तदत्तीति तीव्रमग्निं दूरं विप्रकृष्टे देशे प्रहिणोमि प्रगमयामि। रिप्रं पापं तस्य वोढा सोऽग्निः यमराज्ञो यमो राजा येषां तान् यमराजकान् प्रदेशान् गच्छतु प्राप्नोतु अथ शान्तिकर्म्मार्थमुपासने इतरः क्रव्यादादन्यो जातवेदा अग्निरिहैव देशे देवेभ्यो देवार्थं हव्यं वहतु” भाष्ये दक्षिणपश्चिमदेशे तस्याग्नेः प्रक्षेपणोक्तेः। ४मांसभक्षके मृगभेदे “यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति” भाग० ५,२६,१५,।

क्रव्यादाश्च व्याघ्रदयस्तद्योनिप्राप्तिश्च अभक्ष्यभक्षणपापात् भवतीति मनुनोक्तं “हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षणात्” क्रव्यादा व्याघ्रादयः कुल्लू० क्रव्यादिन्प्रभृतयोऽप्यत्र स्त्रियां ङीप्।

**क्रशि** नामधातुः कृशं करोति णिच् ऋतोरः। क्रशयति ते अचक्रशत् त। क्त क्रशितः। “क्रशितं शरीरमशरीरशरैः” माघः। क्रशितं कृशीकृतम्।

**क्रशिमन्** पु० कृशस्य भावः दृढा०इमनिच् ऋतोरः। कार्श्ये “सुभ्रुवां क्रशिमशालिभि मध्ये” माघः।

**क्रशिष्ठ** त्रि० अतिशयेन कृशः इष्ठन् ऋतोरः। अतिशय कृशे। ईयसुन्। क्रशीयस् तत्रार्थे त्रि०। स्त्रियां ङीप्।

**क्रा** त्रि० क्रम्–विट् मस्यात्। क्रान्तरि उदधिक्राः।

**क्राकचिक** त्रि० क्रकचः करपत्रं तत्क्रियया जीवति ठक्। करपत्रक्रियोपजीविनि (कराति)। “मायूरकाः क्राकचिकाः वेधकारुचकास्तथा” रामा०अयोध्याकाण्डे ८३अ०

**क्राथ** पु० क्रथदेशानां राजा अण्। १राहुग्रहावतारे दक्षिणापथेश्वरे नृपभेदे “ग्रहन्तु सुषुवे यन्तु सिंहिकार्केन्दुमर्द्दनम्। स क्राथ इति विख्यातो बभूव मनुजाधिपः” भा० आ०६७अ०। “तमन्वयुर्न्द पार्श्वे व दक्षिणापथवासिनः। क्राथोऽंशुमान् श्रुतर्वा च वेणुदारिश्च वीर्य्यवान्” हरिवं०११८अ०। २रामसेनापतिवानरभेदे च “नलनीलाङ्गदक्राथमैन्दद्विविदपालिता। ययौ सुमहती सेना राघवस्यार्थसिद्धये” भा० व० २८३अ०। ३नागभेदे “ह्रादः क्राथः शितिकण्ठोग्रतेजास्तथा नागौ चक्रमन्दातिचण्डौ” भा० सौ० ४अ०। क्रथ–भावे घञ्। ४मारणे पु० हेम०

**क्रान्त** पुंस्त्री क्रम–कर्त्तरि क्त। १घोटके स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। कर्म्मणि–क्त। २आक्रान्ते ३आरूढे च त्रि० “क्रान्तं रुचा काञ्चनवप्रभाजा” माघः “अश्वक्रान्ते! रथक्रान्ते! विष्णुक्रान्ते! वसुन्धरे!” स्नानमन्त्रः। ४पादेन्द्रिये न०। “मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्” मनुः “क्रान्ते पादेन्द्रिये” कुल्लू०। भावे–क्त। ५क्रमणे न०। तदभिहितो भावोद्रव्यवत् प्रकाशते” इत्युक्तेः ६क्रमणकर्म्मणि न० “विष्णोः क्रान्तमसीतीमे लोकाः विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तम्” शत० ब्रा० ५।४।२।६। कर्त्तरि क्त। ७वृहत्यां स्त्री राजनि० ८अतीते त्रि०क्रान्तदर्शी

**क्रान्तदर्शिन्** त्रि०क्रान्तमस्मद्बाह्येन्द्रियविषयतामतिक्रान्तं वस्तु भूतादि सर्व्वं वस्तु द्रष्टुं शीलमस्य दृश-णिनि। १अतीतादि वस्तुद्रष्टरि २सर्वज्ञे ब्रह्मणि न०कविशब्दे १८३१पृ०दृश्यम्।

**क्रान्ति** स्त्री० क्रम-भावे क्तिन्।१पादविक्षेपे २गतौ च हेम० अयनशब्दे २२९पृ०दर्शिते ज्योतिषप्रसिद्धे अपमशब्दार्थे-तत्रानुक्रमविकं सू० सि० रङ्गनाथाभ्यां दर्शितं यथा “ननु गोले वृत्ते द्वादशराशीनां सत्त्वादन्यथा चक्रकलानुपपत्ते रित्यत्रैकवृत्ताभावात् कथं राश्यङ्कनं ?राशिविभागानुपपत्तिश्च अन्तरालभागस्याकाशात्मकत्वादित्यतो वृत्तकथनच्छलेन पूर्वोक्तं स्पष्टयन् सूर्य्यस्तद्वृत्ते भगणभोगं करोतीत्याह” रङ्ग०। “अयनादयनं चैव कक्षा तिर्यक् तथाऽपरा। क्रान्तिसञ्ज्ञा तया सूर्य्यः सदा पर्येति भासयन्” सू०सि०। “अयनस्थानमारभ्यायनं परिवर्त्तनं तदयनस्थानपर्यन्तम्। चकार आरम्भसमाप्त्योर्भिन्नायनस्थाननिरासार्थकः। अपरा गोले आधारवृत्तप्रमाणा वृत्तरूपा कक्षा तथा राश्यङ्कमार्गेण। एवकारोऽन्यमार्गव्यवच्छेदार्थकः। तिर्यक् उक्तवृत्तानुकारविलक्षणानुकारा क्रान्तिसञ्ज्ञा क्रमणं क्रान्तिः ग्रहगमनभोगज्ञानार्थं वृत्तं तत्सञ्ज्ञमुपकल्पितम्। अयनविषुवद्द्वयसंज्ञं क्रान्तिवृत्त द्वादशराश्य-